द्वितीय अङ्क

2015
ISSN 0975-6256

राष्ट्रीय शोध-पत्रिका

# ललिता

कवि-भारती

Vol. - VII ❊ No. - 2

LALITĀ

संरक्षकाः
जगद्गुरु श्रीमद्रामानुजाचार्य स्वामी श्रीवासुदेवाचार्य
'विद्याभास्कर' महाराजाः



प्रधान-सम्पादक
डॉ० कमलाकान्त त्रिपाठी

प्रकाशकः
किशोर-विद्या-निकेतनम्
बी-2/236-बी-ए-1- भारतीय स्टेट बैंक, अस्सी शाखा के बगल में
भदैनी, वाराणसी-1

# ज्ञानस्वरूपं ब्रह्म


जानकीशरणदासः
दर्शनसङ्कायाध्यक्षः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्,
गिर-सोमनाथः-३६२२६६ (गुजरातम्)
email- janakisharan@gmail.com



कूटशब्दः- ब्रह्म, ज्ञानम्, ब्रह्मलक्षणम्, वृत्तिज्ञानम्, अन्तःकरणम्, वृत्तिः, स्वरूपज्ञानम्, अखण्डाकारवृत्तिः संवित्।



**शोधसारः**

सर्वव्यवहारस्य कारणं ज्ञानं भवति। ज्ञानशब्दोऽयं मूलतः बोधपर्यायोऽस्ति। दर्शनभेदेन ज्ञानस्वरूपे वैविध्यं दृश्यते। तथा हि तज्ज्ञानं किं नित्यमुत अनित्यमिति विचारे ज्ञानमनित्यमित्याहुः वैशेषिकाः। तेषां मते आत्ममनस्संयोगे सति आत्मविशेषगुणभूतं ज्ञानं जायते, तत्संयोगनाशे तु नश्यति, अतो ज्ञानमनित्यमिति तेषां राद्धान्तः। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतिप्रमाणमुररीकृत्य ज्ञानं नित्यम्, तच्च आत्मनः स्वरूपमेव, न गुण इति सङ्गिरन्ते। "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिरपि ज्ञानं ब्राह्मणः स्वरूपमिति ज्ञापयति। किन्तु लोके घटपटादीनां ज्ञानम् अनित्यं दृश्यते, तर्हि यज्ज्ञानं ब्रह्मणः स्वरूपम् उच्यते, तत् कथम् अनित्यं भवितुमर्हति? किञ्च सुषुप्त्याद्यवस्थासु यज्ज्ञानं भवति तस्य ज्ञाता कः? एतादृशाः बहवो हि प्रश्नाः समुद्भवन्ति, तेषां वेदान्तशास्त्रदृष्ट्या समालोचनात्मसमीक्षा अस्मिन् शोधपत्रे प्रस्तूयते।


**ज्ञानाज्जायते हि सर्वं ज्ञाने च परिलीयते।**
**ज्ञानेनैव च पाल्यते तस्मै ज्ञानात्मने नमः।।**

ज्ञानार्थकाद् दृश् धातोः करणार्थे "करणाधिकरणयोश्च"[१] इति सूत्रेण करणेऽर्थे ल्युट्प्रत्यये सति दर्शनशब्दस्य सिद्धिर्भवति। अस्य दर्शनशब्दस्य अर्थो विद्यते-तच्छास्त्रं येन शास्त्रेण यथार्थतत्त्वस्य ज्ञानं भवति। तच्छास्त्रं विद्यते वेदान्तादिशास्त्रम्। दर्शनशब्दस्य वेदान्तादिशास्त्रम् इत्यर्थः कथं लभ्यत इति चेदुच्यते- दृश्यते = ज्ञायते यथार्थतत्त्वं येन शास्त्रेण तद्दर्शनम्। ज्ञानैनेव हि सर्वं विचारयितुं शक्यते। तत्त्वज्ञानार्जने व्यापृताः शान्तचित्ता जितेन्द्रिया दिव्यचक्षुषो निखिलपदार्थजातं करतलामलकवत् प्रत्यक्षीकुर्वाणा विवेकविचारशीला मानवसमुदायस्य श्रेयसे कल्याणकामनया च यानि तत्त्वानि याँश्च सिद्धान्तान् ज्ञानप्राप्तिसाधनभूतान् आविर्भावयामासुः तानि दर्शनानि इति व्यवह्रियन्ते। एवञ्च दर्शनमिति नाम्ना प्रसिद्धं शास्त्रं तत्त्वज्ञानादेव प्रारब्धमिति। तच्च तत्त्वज्ञानं केनचित् साधनेन भवति, तस्य साधनविशेषस्य प्रदर्शनं, अपि च तेन साधनेन



तत्त्वज्ञानं कीदृशं भवति इत्युभयं तत्तद्दर्शनेन भवति। सर्वा अपि दर्शनसरण्यः तत्त्वसमीक्षार्थमेव खलु प्रवर्तन्ते। तथापि तासां सर्वासां चिन्तनविधिर्भिन्नः। किञ्च, तत्त्वाधिगमोऽपि भिन्न एव प्रतीयते। तथापि तत्तद्दर्शनग्रन्थपरिशीलनकाले जायते काचिद्विलक्षणैव श्रद्धा। एवञ्च तथ्यातथ्यविवेचनपुरस्सरं परमपुरुषार्थं साधयन्ति दर्शनानि। तत्रापि भारतीयदर्शनसमवाये मुकुटमणिपदवीमुपगच्छति ब्रह्माद्वैतसिद्धान्तः। द्वैतनिषेधेन भवत्यद्वैतसिद्धिः,[२] अद्वैतमतं समाश्रित्य प्रणिनाय भाष्यं भगवच्छङ्कराचार्यः।

ननु किमेतदद्वैतमिति पदं? कं वा अर्थविशेषं प्रकाशयति खल्वेषोऽद्वैतशब्दः। उच्यते- द्वाभ्यामितं द्वीतम्। द्वीतस्य भावो द्वैतम्[३]। द्वैतस्याऽभावः इति अद्वैतम्।[४] एवञ्चाद्वैतशब्दस्य द्वैतनिषेधे तात्पर्यम्। जीवजगद्भासितं विशिष्टं ब्रह्मैव द्वीतम्, तस्य भावो द्वैतम्। ब्रह्मणो जीवजगद्भेदं विशिष्टत्वं ये नानुमन्यन्ते त एवाद्वैतिनः। तथा चात्र सुरेश्वरवार्तिकम्-

द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते।
तन्निषेधेन चाद्वैतं प्रत्यग् वस्त्वभिधीयते।।[५] इति।

## ज्ञानस्वरूपं ब्रह्म

सच्चिदानन्दरूपमेव ब्रह्मणः स्वरूपलक्षणम्।[६] तद्व्याख्यायन् वेदान्तपरिभाषायाः शिखामणिकारोऽब्रवीत्- इतरानिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणमित्यर्थः।[७] यथा लोके कः चन्द्र इति जिज्ञासायां प्रकृष्टप्रकाशः चन्द्र इति चन्द्रस्वरूपमुच्यते, तथैव ब्रह्मस्वरूपविषये सच्चिदानन्दं ब्रह्मेति वेदान्ता बाभाषन्ते। ब्रह्मणः स्वरूपं श्रुतिषु इत्थं निरूपितम् 'सत्यं ज्ञानमनन्तं ब्रह्म'[८], 'विज्ञानमानन्दं ब्रह्म'[९], 'आनन्दो ब्रह्मेति व्यजानात्'[१०] इति। वेदान्तशास्त्रे सत्त्वसत्यत्वयोः भेदो नास्ति। यदेव ब्रह्म सत्तदेव सत्यम्। छान्दोग्योपनिषदि "तत्सत्यम्"[११] इति श्रूयते। अत्र तच्छब्देन जगत्कारणीभूतं सदाख्यं ब्रह्म परामृश्यते। तदेव न्यायादिभाष्यकारेण "येन चात्मना आत्मवत् सर्वमिदं जगत्, तदेव सदाख्यं कारणं सत्यं परमार्थसत्"[१२], "सत्त्वोक्त्यैव सत्यत्वमुच्यते"[१३] इत्यनेन।

अपि च तैत्तिरीयश्रुतौ "ब्रह्मविदाप्नोति परम्"[१४] इति ब्रह्मज्ञानिनो ब्रह्मप्राप्तिलक्षणं मोक्षाख्यं फलमभिधाय किं तद्ब्रह्म इत्याकाङ्क्षायामाह "सत्यं ज्ञानमनन्तं ब्रह्म"[१५] इति श्रूयते। अत्र वेद्यतया विवक्षितं ब्रह्म विशेष्यम्, सत्यादीनि त्रीणि तस्य विशेषणानि। यथा नीलं महत्सुगन्ध्युत्पलम् इत्यत्र त्रिभिः विशेषणैः विशेष्यमुत्पलं विशेष्यान्तरेभ्यो निर्धार्यते, तथैवेहापि सत्यादिविशेषणत्रयोपेतं ब्रह्म इतरव्यावृत्ततया निर्धार्यते। किन्तु अत्रायं विशेषो यदिमानि विशेषणानि लक्षणार्थानि। यतो हि विशेषणं सजातीयव्यावर्तकं भवति। ब्रह्मणश्च सजातीयं न किमप्यस्ति। अतः एतानि सत्यादीनि लक्षणार्थप्रधानानि, लक्षणस्य सजातीयविजातीयव्यावर्तकत्वात्। अत्रायं भावः- ब्रह्मशब्दनिर्वचनबलेन यद् अविशेषतो महत्त्वेन प्रतिपन्नम्, तत् सत्यं ज्ञानमनन्तमिति विशेषतः प्रतिपत्तव्यम् इति विशेषावगतिशेषभूतं लक्षणम्। अतः एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन सम्बध्यते। तथा हि सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्म,आनन्दो ब्रह्मेति। न हि सत्यं ब्रह्म इत्युक्तौ लक्षणस्य क्वचिदतिव्याप्ति र्भवति, ब्रह्मैव केवलं सत्यमिति सिद्धान्तस्य जागरूकत्वात्। एवमानन्दो ब्रह्म इत्यत्रापि, ब्रह्मैव आनन्दः, नेतरदिति सिद्धान्तितत्वात्। तर्हि किमर्थं लक्षणत्रयमिति जिज्ञासा समुदेति। समाधानञ्चास्याः तैत्तिरीयभाष्यादौ प्रसिद्धत्वात् तत्र मृग्यम्।[१६] पुनरुक्तिभयादत्र न प्रपञ्च्यते।

अस्मिन् स्वरूपलक्षणे लक्षणार्थाः सत्यादिविशेषणशब्दा विशेषणान्तरेण असम्बद्धाः केवलं ब्रह्मशब्देन

सम्बध्यन्ते। अतः सत्यं ब्रह्म इत्युक्तौ ब्रह्मणः असत्याद् अनृतादिकाराद् व्यावृत्तिः ज्ञायते। ब्रह्मणः सत्यत्वे च तस्य जगत्कारणत्वं प्रांप्तम्। एवं सति कुलालादिषु कर्तृत्वादिकारकभावदर्शनात् ब्रह्मणः कारकत्वमपि प्राप्तम्। ननु लोके अचिद्रूपाणां मृदादीनां कारणत्वदर्शनात् ब्रह्मणः अपि कारणत्वे तस्य मृद्वत् जडत्वं प्राप्तमिति चेत्- उच्यते, ज्ञानं ब्रह्म इति। ज्ञानशब्दोऽत्र भावव्युत्पत्त्या सत्यादिपदसन्निधानात् निर्विशेषं चिन्मात्रं लक्षयति। तथापि लौकिकज्ञानवद् अन्तवत्त्वदर्शनात् ब्रह्मणोऽपि अन्तवत्त्वं स्यात्। अत उक्तम् अनन्तं ब्रह्म इति। देशकालवस्तुपरिच्छेदशून्यम् इत्यर्थः। एवमपि ब्रह्मप्राप्तिः मोक्ष इति सिद्धान्तात्, मोक्षो हि ब्रह्मस्वरूपः। मोक्षप्राप्त्यर्थं च मुमुक्षवः तदैव प्रयतेरन्, यदि तत्र आनन्दस्स्यात्। आनन्दशून्यस्य पुरुषार्थत्वासम्भवात्। किन्तु मोक्षे ब्रह्मातिरिक्तं किमपि नास्ति। अतः मोक्षकालीन आनन्दो ब्रह्मस्वरूपः। अत एवोक्तमद्वैतसिद्धौ **''यद्यपि सर्वेषां सत्यादिपदानां लक्ष्यमेकमेव निर्विशेषं ब्रह्म तथापि निवर्त्तनीयांशाधिक्येन न पदान्तरवैयर्थ्यम्''**[१७] इति।

**ज्ञानस्य द्वैविध्यम्**

सर्वव्यवहारस्य कारणं **''सर्वव्यवहारहेतुर्बुद्धिर्गुणो ज्ञानम्''**[१८] इति तर्कसङ्ग्रहोक्तरीत्या ज्ञानं भवति। तज्ज्ञानं किं नित्यमुत अनित्यमिति विचारे ज्ञानमनित्यमित्याहुः वैशेषिकाः। तथा हि आत्ममनस्संयोगे सति आत्मविशेषगुणभूतं ज्ञानं जायते, तत्संयोगनाशे तु नश्यति, अतो ज्ञानमनित्यमिति तेषां राद्धान्तः। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतिप्रमाणमुररीकृत्य ज्ञानं नित्यम्, तच्च आत्मनः स्वरूपमेव, न गुण इति सङ्गिरन्ते। **''सत्यं ज्ञानमनन्तं ब्रह्म''**[१९] इति श्रुतिरपि ज्ञानं ब्रह्मणः स्वरूपमिति ज्ञापयति। उक्तञ्चेतदद्वैतमकरन्दे- **''स्वरूपमेव मे ज्ञानं न गुणः''**[२०] इति। अत्र ज्ञानशब्दो ज्ञायत इति ज्ञानमिति भावव्युत्पत्तिकः। अतः ज्ञप्तिः अवबोध इत्यनेन स्वरूपज्ञाने पर्यवस्यति। ज्ञानस्य ज्ञायते अनेनेति करणव्युत्पत्तिरपि वक्तुं शक्या, किन्तु सत्यानन्तशाब्दाभ्यां सह सामानाधिकरण्यविरोधाद् वेदान्तिभिः सा व्युत्पत्तिः नाद्रियते। तथा हि त्रिकालाबाध्यत्वं सत्यत्वम्। ब्रह्मणो ज्ञानकर्तृत्वेन विक्रियमाणे सति ज्ञेयज्ञानाभ्यां प्रविभक्तस्य तस्य परिच्छेदराहित्यमपि न सम्भवति। अत एव **''यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्''**[२१] इति श्रुत्या भूमाख्ये ब्रह्मणि दर्शनादिक्रियाकारकाभावो दर्शितः। क्रियादिप्रविभक्तस्य तु परिच्छिन्नत्वं प्रोक्तम्। अतः ब्रह्म न वस्त्वन्तरज्ञानकर्तृ। नापि स्वात्मानमेव ब्रह्म विजानाति, एकस्मिन् कर्तृकर्मभावविरोधात्। अतः सत्यादिपदसन्निधानाज्ज्ञानशब्दोऽत्र भावव्युत्पत्त्या निर्विशेषं चिन्मात्रं ज्ञप्तिरेव। यद्यपि क्रियासामान्यमत्र भाव इत्युच्यते। ब्रह्मस्वरूपत्वात् ज्ञानं नित्यमिति सिद्ध्यति, न हि अनित्यं ज्ञानं नित्यस्य ब्रह्मणः स्वरूपं भवितुमर्हति।

अत्रेयं शङ्का- ज्ञानस्वरूपब्रह्मणो नित्यत्वात् "अयं घटः अयं पटः" इत्यादिज्ञानमपि नित्यं स्यात्। अपि च सुषुप्तौ न किमपि ज्ञानं भवतीति अस्माकमनुभवः। वेदान्तरीत्या ब्रह्मणि अध्यस्तत्वात् प्रपञ्चोऽपि ज्ञानमयस्स्यात्। किञ्च ज्ञानस्वरूपत्वाद् ब्रह्म ज्ञानविषयो न भवति। अतः कथं ज्ञानं नित्यम्, कथं वा तद्ब्रह्मणः स्वरूपमित्यादिशङ्कालेशः ज्ञानस्य द्वैविध्यकथनेन निराक्रियते। तथा हि ज्ञानमात्मस्वरूपचैतन्यमेकरसमपि वृत्तितः स्वरूपादपि द्विप्रकारं भवति- स्वरूपज्ञानं वृत्तिज्ञानञ्चेति। तथा चोक्तं कैवल्यदीपिकायाम्-

**एकं ज्ञानं परमकथितं वृत्तितश्च स्वरूपाद्**
**वृत्तिज्ञानस्वरूपाभिधचितिरवभात्येव वत्सास्ति नान्यत्।**



**नाज्ञानस्यैव शत्रुर्भवति परचितिर्दृष्टमेवैति सुप्तौ**
**वृत्तौ लग्ना स्वरूपाभिधचितिरपि सा नाशयेत् स्वीयमोहम्।।**[२२] इति।

ज्ञानस्य नित्यत्वे श्रुतिः प्रमाणम्। श्रुत्यविरोधितर्केणापि ज्ञानस्य नित्यत्वं साधयितुं शक्यते। तथा हि जागरिते रूपज्ञानम्, रसज्ञानम्, गन्धज्ञानमित्येवं मिथो भेदेन विषयाणाम् अननुगमेऽपि, एकरूपं ज्ञानं तु सर्वत्रानुगतम्। अतो यथा एकोऽप्यकाशःघटाद्युपाधिभेदाद् भिद्यते, तथैव एकमपि ज्ञानं विषयोपाधिकतया तु भिद्यते, परं स्वतस्तु भेदशून्यमित्यवगम्यते। एवं स्वप्नेऽपि यज्जाग्रद्वासनानिमित्तकं ज्ञानं भवति तदपि ज्ञानत्वाविशेषाज्जागरितज्ञानान्न भिद्यते। यद्यपि सुषुप्तौ अहमिदं जानामीत्याकारकं ज्ञानं नानुभूयते, तथापि एतावता सुषुप्तौ ज्ञानमेव नास्तीति वचनं साहसमात्रम्। उत्थितस्य पुरुषस्य सुखमहमस्वाप्सं न किञ्चिदवेदिषम् इति परामर्शो जायते। परामर्शोऽयमनुभवन्तमरा न जायते। अतः सुषुप्तिकालेऽपि सुखस्य अज्ञानस्य चानुभव आसीदिति गम्यते। तच्च ज्ञानं ज्ञानत्वाविशेषाज्जागरितज्ञानान्न भिद्यते। एवमेकस्मिन् दिने यथा एकमेव ज्ञानं तथैव दिनमासादिक्रमेण सर्वस्मिन्नपि काले ज्ञानं भेदशून्यम्, अत एव नित्यमपि। किञ्च यदि ज्ञानमनित्यं स्यात्, तदा तस्य उत्पत्तिविनाशयोः ग्रहणमेव न स्यात्। असाक्षिकोत्पत्तिविनाशौ तु वक्तुमेव अशक्यौ। किञ्च स्वेनैव स्वग्रहणमपि न युज्यते। अतोऽपि ज्ञानं नित्यमेव। इदं ज्ञानं स्वप्रकाशमपि। तथा हि एकत्र कर्तृकर्मभावविरोधाज्ज्ञानं न तावत् स्वसंवेद्यम्। यदि ज्ञानान्तरेण गृह्यते तदा तस्य ग्राहकस्यापि ज्ञानस्य ग्रहणार्थं पुनर्ज्ञानान्तरमित्यनवस्थाप्रसङ्गस्स्यात्। अतः इदं ज्ञानं स्वप्रकाशमित्येव स्वीकरणीयम्। स्वप्रकाशत्वे सति स्वेतरावभासकत्वं स्वप्रकाशत्वम्। अर्थात् अपरोक्षं विषयावभासकं च सदपि ज्ञानं प्रकाशान्तरानपेक्षमित्यतः तत् स्वप्रकाशम्। एवमात्मनो नित्यत्वाज्ज्ञानस्य नित्यत्वस्वप्रकाशत्वे सिद्धे। स्वप्रकाशत्वाच्च ज्ञानमेव आत्मेति सिद्ध्यति। तदेवाचीकथन् पञ्चदशीकाराः-

**मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा।**
**नोदेति नास्तमेत्येका संविदेषा स्वयम्प्रभा।।**[२३] इति।

पूर्वोक्तरीत्या स्वाप्निकज्ञानं जाग्रज्ज्ञानान्न भिन्नम्, ज्ञानत्वाविशेषात्। तथैव सौषुप्तिकबोधोऽपि स्वाप्निकाद् न भिन्नः। एवं स्थानत्रयेऽपि एकस्मिन्दिने जाग्रदादिषु संविदेका। एवं दिनान्तरेऽपि सा संविदभिन्ना। अतीताऽऽगामिषु मासाब्दयुगकल्पेषु सा संविन्नोदेति नाऽस्तमेति, कालत्रयाबाध्यत्वात् सत्या नित्या चेति भावः। एषा संवित् स्वयम्प्रकाशा नान्यैः प्रकाश्यते। **''विज्ञातारमरे केन विजानीयात्''**[२४], **''अमृतोऽदृष्टो द्रष्टाऽश्रुतश्श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता''**[२५], **''तस्य भासा सर्वमिदं विभाति''**[२६], **''न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्''**[२७] इत्यादिश्रुतिशतमत्र प्रमाणमिति भावः।

यत्तु उत्पत्तिविनाशशालितया प्रतीयते, तदन्तःकरणवृत्त्यात्मकं ज्ञानम्। वृत्तिज्ञानमपि न स्वरूपज्ञानाद् भिन्नम्, आधारं विनाऽऽधेयायोगात्। अयमेवार्थो कैवल्यदीपिकाग्रन्थकारेण सदृष्टान्तमेवं विवृतम्-

**स्वरूपज्ञानं यन्न दहति सुषुप्तावपि तमः**
**कथं वृत्तौ लग्नं गुरुवर! दहेच्चेदिति तमः।**
**रवेरुस्रा यद्वन्न दहति न जगत्सूर्यदृषदि**
**प्रसक्तश्चेत् सर्वं दहति हि तथैतच्छृणु सखे।।**[२८] इति।

ब्रह्माभिन्नत्वाज्जीवोऽपि ज्ञानस्वरूप एव। तदसुसूत्रत् सूत्रकारः ''**ज्ञोऽत एव**''[२९] इति। तदेव अविकृतस्य ब्रह्मण एव अविद्योपाधिकस्य जीवरूपेण अवस्थानाद् उत्पत्तिविनाशरहितो नित्यचैतन्यस्वरूपो जीव इति सूत्रार्थः। न च ''**नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः**''[३०] इति सूत्रेण पचादिभ्यः कर्त्रर्थे अच्प्रत्ययो विहितः। पचादेःआकृतिगणत्वात् ''जानाति इति ज्ञः'' इति कर्त्रर्थकाच्प्रत्ययान्तत्वाज्ज्ञशब्दस्य कथं चैतन्यात्मकार्थ-बोधकत्वमिति शङ्कनीयम्। ''**घञर्थे कविधानम्**''[३१] इति वार्त्तिकेन भावार्थकप्रत्ययान्तत्वाज्ज्ञशब्दस्य चैतन्यस्वरूपबोधकत्वमविरुद्धम्। ब्रह्माभिन्नत्वाज्जीवोऽपि ब्रह्मस्वरूप इति कथयता सूत्रकारेण ब्रह्मणः ज्ञानस्वरूपत्वमपि सूचितम्। ''**न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽनादित्वात्**''[३२], ''**अत्रायं पुरुषः स्वयंज्योतिः**''[३३], इत्यादिश्रुतयः अमुमेवार्थं बोधयन्ति। एवं जीवो मलिनसत्त्वप्रधानाविद्योपाधिकतया न स्वरूपचैतन्येनैव सर्वावभासनक्षमः। अतो विषयावभासनार्थं तेन वृत्तिरपेक्ष्यते। तत्र **वृत्तिर्नाम इन्द्रियद्वारा विषयदेशं गत्वा अन्तःकरणस्य विषयाकारः परिणामः**। एतदवच्छिन्नं चैतन्यं प्रमाणचैतन्यमिति कथ्यते। अन्तःकरणावच्छिन्नं चैतन्यं तु प्रमातृचैतन्यम्। विषयावच्छिन्नं चैतन्यं प्रमेयचैतन्यम्। अर्थात् एकमेव चैतन्यमन्तःकरणविशिष्टं सत् प्रमातृचैतन्यम्, वृत्त्युपारूढं सत् प्रमाणचैतन्यम्, विषयाधिष्ठानभूतं सत् विषयचैतन्यमिति व्यवह्रियते।

अन्तःज्ञानसाधनमन्तःकरणं अतिस्वच्छतैजसद्रव्यम्। तेजः सत्त्वगुणं प्रकाशकञ्च। तेन तैजसमन्तःकरणमपि अत्यन्तस्वच्छं विरलं तेजो द्रव्यम्। आकाशदिपञ्चतन्मात्रगतसात्त्विकांशेभ्यो हि अन्तःकरणं समुत्पन्नम्। अतः सूर्यकिरणवदन्तःकरणं नयनादिद्वारेण निर्गत्य दीर्घप्रभाकारेण परिणतं झटिति विषयदेशं प्राप्य विषयाकारं भवति। तदा वृत्तिद्वारा विषयचैतन्यस्य प्रमातृचैतन्यस्य यथा कुल्याद्वारा तडागकेदारसलिलयोः अभेदो भवति, तद्वदेकीभावः सम्पद्यते।

अत्र एवं शङ्का भवितुमर्हति यदत्र चैतन्यस्य वृत्तिविषयरूपम् उपाधिद्वयमस्ति, अतः कथं चैतन्याभेद इति। सा शङ्का एवं समाधेया- विशेषणयोरिव उपाध्योः न स्वरूपेण भेदकत्वम्, किन्तु भिन्नदेशस्थत्वेन। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते। तद्वदत्रापि वृत्तिविषययोः बहिरेकदेशावस्थानतया भिन्नदेशस्थाभावाद् उपधेयं चैतन्यं न भिद्यते। एवम् अन्तःकरणतद्वृत्तिविषयचैतन्यानाम् अभेदाभिव्यक्त्या ''अयं घट'' इति ज्ञानं जायते। अत्र वृत्तेः जडत्वाद् वृत्तिरेव ज्ञानमिति वक्तुं न शक्यते। इयं चैतन्याभिव्यक्तिः वृत्तिकृता इत्यत्र वृत्तौ चैतन्यमारोप्यते। तदुक्तं विवरणे ''**अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्**''[३४] इति। एवञ्च चैतन्याभेदाभिव्यक्तिः वृत्तेः कार्यम्। जीवचैतन्यस्य विषयचैतन्यस्य च सम्बन्धार्था वृत्तिरिति विवरणानुगामिनः, आवरणाभिभवार्था वृत्तिरिति मतान्तरम्। एतेषां मते वृत्त्या विषयदेशस्थ-जीवचैतन्यगतम् आवरणं यदाऽभिभूयते तदा विषयप्रकाशः।

जीवस्य स्वरूपभूतं यत्साक्षिज्ञानं भवति तत्तु अनावृतमेव। तत् सर्वत्र वृत्तिज्ञानेष्वननुगतत्वात् सर्वाणि वृत्तिज्ञानानि विषयीकरोति। तथा च श्रुतिः ''**प्रतिबोधविदितं मतममृतत्वं हि विन्दते**''[३५] इति। अस्मिन् श्रुतिवाक्ये ''**बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते**''[३६] इति भाष्यवचनाद् बोधपदं वृत्तिज्ञानपरम्। जडा अपि वृत्तयो यद्योगात् स्वयम्प्रभा इव भवन्ति, तत्स्वयम्प्रभं ब्रह्मैव अहमिति चित्तमपि ब्रह्मज्ञानकारणं भवति। भाष्यकारैरपि अयमेवार्थः अभ्यधायि-''**सर्वे प्रत्ययाः विषयीभवन्ति यस्य स आत्मा सर्वबोधान् प्रतिबुध्यते। सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेषु अविशिष्टतया लक्ष्यते, नान्यद्द्वारमात्मनो**



**विज्ञानाय**''[३७] इति। अपि च-

**नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं**
**ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते।।**[३८]

इत्यनेन सर्वेषु वृत्तिज्ञानेषु स्वरूपज्ञानस्य अनुगतत्वात् चाक्षुषादिज्ञानमपि स्वरूपज्ञानस्य अंशभूतम्। अयमेवार्थः सिद्धान्तलेशसङ्ग्रहे दीक्षितैः एवं निरूपितम्- ''**चैतन्यमात्रावरकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव, ज्ञानेन एकेदेशेन नाशः**''[३९] इति। एवञ्च अल्पांशेन नष्टेऽपि, सर्वात्मना नाशाभावात्, छिन्नेऽपि पुच्छे श्वा श्वैव नान्यत् इति न्यायेन अज्ञानस्य अनुवृत्तिर्युक्ता इति भावः। एवं ब्रह्मज्ञानरूपेण सर्वत्रानुगतम्। अतो ज्ञानमेव ब्रह्म, न तु ज्ञानस्य विषय इति। यस्तु एतद्विपरीततया अहं ब्रह्म ज्ञातवान् इति ज्ञानविषयत्वेन ब्रह्म जानाति, स अज्ञानी एव, तेन अविषयस्य ब्रह्मणो विषयत्वेन ज्ञातत्वात्। तथा च श्रुतिः-

**यस्यामतं तस्य मतं मतं यस्य न वेद सः।**
**अविज्ञातं विजानतां विज्ञातमविजानताम्।।**[४०] इति।

एवं ज्ञानाविषयस्याद्वितीयस्यापि स्वरूपज्ञानस्य अंशभूतत्वाद् अन्तःकरणवृत्तौ ज्ञानत्वोपचारस्तु विद्यते। अत एव श्रुतावपि क्वचिदात्मस्वरूपभूताज्ज्ञानाद् वृत्तिज्ञानस्य व्यावृत्तिः क्रियते। यथा ''**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः**''[४१] इत्यत्र अन्तश्शब्दः बुद्धिवृत्तिव्यावर्तकः। वृत्तेः विषयदेशस्थतया सर्वान्तरत्वाभावात्तस्य व्यावृत्तिः। तथा चाभाणि भाष्यकारेण-''**अन्तरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थम्**''[४२] इति।

वस्तुतस्तु मायाविशिष्टाद् ब्रह्मणो जगति उत्पद्यमाने सति अन्तःकरणमप्युत्पद्यते। तत्र ''**तन्मनोऽसृजत**'', ''**एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च**''[४३] इत्यादिश्रुतिर्मानम्। एवं सादिद्रव्यत्वात् अन्तःकरणं सावयवम्। सावयवत्वात्तस्य विषयाकारेण वृत्तिरूपः परिणामोऽपि सम्भवति। तथा च श्रुतिः ''**काम सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव**''[४४] अत्र धीशब्देन वृत्तिरूपज्ञानमभिहितम्। एवं वृत्तिज्ञानमन्तःकरणस्य विकारः, सविषयकञ्च। स्वरूपज्ञानन्तु ब्रह्मस्वरूपत्वादेव न विकारभूतम्, नापि सविषयकम्। किन्तु तत्केवलं ''**प्रज्ञानघन एव**''[४५] इति श्रुत्या ज्ञातम्। ''**सत्यं ज्ञानमनन्तं ब्रह्म**''[४६] इति ब्रह्मशब्दस्य सत्यानन्दशब्दाभ्यां सामानाधिकरण्याच्च। अपि च उत्पन्नादेव अन्तःकरणमाविद्यकम्। अतः तद्धर्मभूतानि वृत्तिज्ञानान्यपि आविद्यकान्येव। यदा तु श्रुतिशिखोत्थानाखण्डधीवृत्त्या अहं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवास्मि इत्याकारकोऽखण्डब्रह्मसाक्षात्कारः तदा ''**भिद्यते हृदयग्रन्थि**''[४७] इत्यादिश्रुतेः अन्तःकरणस्य नाशाद् आविद्यकानामन्तःकरणवृत्तीनामपि नाशः। एवं च ब्रह्मसाक्षात्कारोऽपि अखण्डाकारवृत्तिरूपः। इयं चैतन्यप्रतिबिम्बसंवलिता चैतन्यगतमज्ञानमेव निवर्तयति। ब्रह्मणि अज्ञाननिवृत्तिरेव वृत्त्या क्रियते, न त्वत्र, ब्रह्मणः स्वप्रकाशज्ञानत्वात् चिदाभासस्य आधानमिति। यथा पटोपादानतन्तुनाशे पटनाशो भवति तथैव अज्ञानस्यैव प्रपञ्चहेतुत्वाद् अज्ञाननिवृत्तौ तत्कार्यभूतः सकलोऽपि प्रपञ्चो निवर्तते। एवं सति चरमवृत्तेरपि अज्ञानकार्यत्वान्निवृत्तिर्भवति। वृत्तौ प्रतिबिम्बितं चैतन्यमपि तदा ब्रह्माभिन्नमेव भवति। यथा सूर्यप्रभाया अवभासने दीपप्रभाअसमर्था भवति, तथा स्वयंप्रकाशाखण्डाब्रह्मावभासने वृत्तिगतंचैतन्यमसमर्थम्। अतो दर्पणाभावे तद्गतो मुखप्रतिबिम्बो यथा मुखमात्रमेव भवति, तथैव स्वोपाधिभूतवृत्तौ बाधितायां वृत्तिगतचैतन्यमपि चैतन्यैकरसं ब्रह्मैव भवतीति शम्।

## सन्दर्भ-

१. अष्टाध्यायी ३.३.११७
२. तत्राद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमित्यात्वमेव प्रथममुपपादनीयम्"- अद्वैतसिद्धिः, पृ.८८
३. "द्विधा इतं द्वीतं तस्य भावः स्वार्थे वा अण्" इति। वाचस्पत्यम्, तृतीयो भागः, पृ.३८३०
४. "द्विधा इतं द्वीतं तस्य भावःद्वैतं भेदः अभावार्थे नञ्तत्पुरुषसमासः" वाचस्पत्यम्, प्रथमो भागः, पृ.११९
५. बृहदारण्यकभाष्यवार्तिकम्, ४,३.१८०७
६. "स्वरूपमेव लक्षणं स्वरूपलक्षणम्"- वे.प., पृ.३०४
७. वेदान्तपरिभाषा शिखामणिव्याख्या, पृ.३०४
८. तैत्तिरीपनिषद्, २.१.१
९. बृहदारण्यकोपनिषद्, ३.९.२८
१०. तैत्तिरीपनिषद्, ३.६.
११. छान्दोग्योपनिषद्, ६.८.७
१२. छान्दोग्योपनिषद्, ६.८.७
१३. तैत्तिरीयोपनिषच्छाङ्करभाष्यम्, २.६
१४. तैत्तिरीपनिषद्, १.१
१५. तैत्तिरीपनिषद्,
१६. द्रष्टव्यम्, तैत्तिरीयोपनिषच्छाङ्करभाष्यम्, १.१
१७. अद्वैतसिद्धिः, पृ.६७६
१८. तर्कसंग्रहः, पृ.७५
१९. तैत्तिरीपनिषद्, २.१
२०. अद्वैतमकरन्दः २३
२१. छान्दोग्योपनिषद्, ७.२४.१
२२. कैवल्यदीपिका २.७९
२३. पंचदशी १.७
२४. बृहदारण्यकोपनिषद्, ४.५.१५
२५. बृहदारण्यकोपनिषद्, ३.७.२३
२६. कठोपनिषद् २.५.१५
२७. कठोपनिषद् १.२.१८
२८. कैवल्यदीपिका २.८०
२९. ब्रह्मसूत्रम् २.३.१८
३०. पाणिनिसूत्रम् ३.१.३४
३१. पाणिनिवार्तिकम् ३.३.५८
३२. बृहदारण्यकोपनिषद्, ४.३.३०
३३. बृहदारण्यकोपनिषद्, ४.३.९
३४. पञ्चपादिकाविवरणम्, पृ.२०३



३५. केनोपनिषद्. २.४
३६. केनोपनिषच्छाङ्करभाष्यम्, २.४
३७. केनोपनिषच्छाङ्करभाष्यम्, २.४
३८. दक्षिणामूर्तिस्तोत्रम् ४
३९. सिद्धान्तलेशसंग्रहः, पृ.१५८
४०. केनोपनिषद्. १.११
४१. बृहदारण्यकोपनिषद्, ४.३.७
४२. बृहदारण्यकोपनिषच्छाङ्करभाष्यम्, ४.३.७
४३. मुण्डकोपनिषद् २.१.३
४४. बृहदारण्यकोपनिषद्, १.५.३
४५. बृहदारण्यकोपनिषद्, ४.५.१३
४६. तैत्तिरीयोपनिषद् २.१
४७. मुण्डकोपनिषद् २.२.८

## संदर्भ ग्रन्थ सूची-


१. कविः, लक्ष्मीधरः, १९९२, अद्वैतमकरन्दः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी
२. गोखले, विष्णुः दिनकरः, १९१४, तैत्तिरीयोपनिषच्छाङ्करभाष्यम्, गुजराती प्रिंटिग प्रेस, बुम्बई
३. दासः, जानकीशरणः, २०१५, कैवल्यदीपिका (प्रभाव्याख्यासहिता), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावल
४. दीक्षितः, अप्पयः, २००५, सिद्धान्तलेशसङ्ग्रहः, भारतीय बुक कार्पोरेशन, दिल्ली
५. धर्मराजाध्वरीन्द्रः, २०११, वेदान्तपरीभाष शिखामणिव्याख्या, राष्ट्रियसंस्कृतसंस्थानम्, नवदिल्ली
६. भट्टः, अन्नम् , १९८६, तर्कसंग्रहः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
७. भट्टाचार्यः, तारानाथः तर्कवाचस्पतिः, १९९०, वाचस्पत्यम्, चौखम्बा संस्कृत सिरीज् ऑफिस्, वाराणसी
८. महर्षिः, पाणिनिः, २०१२, अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
९. मुनिः, विद्यारण्यः, १९९७, पंचदशी, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ
१०. शास्त्री, आचार्य जगदीशलालः, २०००, ब्रह्मसूत्रशाङ्करभाष्यम्, मोतीलाल बनारसीदास, वाराणसी
११. शास्त्री, महादेव, १८९८, दक्षिणामूर्तिस्तोत्रम्, गवर्नमेण्ट ब्रांच प्रेस, मैसूर
१२. शास्त्री, एस.सुब्रह्मण्यम्, २००४, उपनिषद्भाष्यम् (भागः १-३), दक्षिणामूर्तिमठ प्रकाशनम्, वाराणसी
१३. सरस्वती, मधुसूदनः, १९९८, अद्वैतसिद्धिः, परिमल पब्लिकेशन्स, नई दिल्ली
१४. सुरेश्वराचार्यः, १९८२, बृहदारण्यकभाष्यवार्तिकम्, महेश-अनुसन्धान-संस्थानम्, वाराणसी


***